Roll No. .... Total No. of Pages : 5

Total No. of Questions : 10

प्रथमा तृतीय वर्ष (8वीं) वार्षिक परीक्षा 2025-26

विषय कोड : 0810

संस्कृतव्याकरणम् सामान्यम्

समय : 3 घण्टे **पूर्णांक : 100**

निर्देशा: – (i) सर्वे प्रश्ना: समाधेया:।

(ii) प्रश्नानां उत्तराणि संस्कृत भाषायां देयानि।

1. उचितं विकल्पं चित्त्वा लिखत : 5

(1) क्रोधात् किं भवति ?

(क) सङ्ग: (ख) स्मृतिविभ्रम

(ग) सम्मोह: (घ) बुद्धिनाश:

(2) केन सदृशं पवित्रं वस्तु नास्ति ?

(क) कर्मणा (ख) ज्ञानेन

(ग) युद्धेन (घ) क्रोधेन

(3) सर्वा: क्रिया: केन सिद्ध्यन्ति ?

(क) मौनेन (ख) पठनेन

(ग) भ्रमणेन (घ) अभ्यासेन

(4) मूषकस्य नाम किम् आसीत् ?

(क) हिरण्यक: (ख) लघुपतनक:

(ग) चित्रग्रीव: (घ) व्याध:

(5) तेनालीराम: कस्यां: भाषाया: कवि: आसीत् ?

(क) हिन्दयाम् (ख) संस्कृतस्य

(ग) तमिलभाषाया: (घ) तेलुगुभाषाया:

2. रिक्तस्थानानि पूरयत् – 6

विशाला:, पचनं, जनक:, स्वच्छतां, शुद्धम्, तारका:

(क) अस्माभि: .... जलं पातव्यम्।

(ख) एकस्मिन् वने एक: .... वटवृक्ष: आसीत्

(ग) एकदा मिथिलाया: राजा .... एकस्य यज्ञस्य आयोजनम् अकरोत्।

(घ) आलुकस्य .... विलम्बेन भवति।

(ङ) ब्रह्माण्डे .... सन्ति।

(च) जलेन शरीरस्य .... भवति।

3. यथायोग्यं योजयेत् – 7

(क) मूर्खाणाम्	–	उन्नत-अवनतभूमि:
(ख) स्वेदजकशाकम्	–	संस्कृतम्
(ग) षडेते	–	व्यसनेन
(घ) लद्दाख:	–	छत्रशाकम्
(ङ) रीतिनीति	–	सत्य भाषणेन
(च) मनस: स्वच्छता	–	शतरंज
(छ) बुद्धिमतां क्रीडा	–	नित्य दुखिता:

4. सत्य कथनानां समक्षे 'आम्', 'असत्य' कथनानां समक्षे 'न' इति लिखन्तु – 7

(क) लद्दाखः उपत्यकानां प्रदेशः अपि कथ्यते।

(ख) ध्रुवः तारकः सप्तर्षिमण्डलस्य अन्तर्गतं भवति।

(ग) रेलस्थानकेषु स्वच्छता सप्ताहे एकवारं भवति।

(घ) कोशातकी कन्दशाकं भवति

(ङ) सिन्धुघाटी सभ्यतायाम् अपि जनाः चतुरङ्गं क्रीडन्ति स्म।

(च) चन्द्रशेखराजादः विरेष्वग्रगण्यः अस्ति।

(छ) गीतायाः लेखकः श्रीगणेशः अस्ति।

5. एकशब्देन उत्तरं देयम् – 7

(क) कारवेल्लशाकं स्वादे कथं भवति ?

(ख) मोहनजोदड़ो इति कस्याः सभ्यतायाः नगरम् आसीत् ?

(ग) सौरमण्डले कति ग्रहाः विद्यन्ते ?

(घ) गार्गी कस्य पुत्री आसीत् ?

(ङ) तेनालीरामस्य पूर्णं नाम किम् अस्ति ?

(च) शक्त्या भारतं कीदृशं भवेत् ?

(छ) कस्मिन् काण्डे आजादस्य सक्रिया भूमिका आसीत् ?

6. अतिलघूत्तरीया: प्रश्ना: समाधेया: – 10×2=20

(क) धीमतां काल: कथं गच्छति ?

(ख) मूषक: किम् अकरोत् ?

(ग) आजादस्य जनकस्य जनन्या: च नाम किम् आसीत् ?

(घ) पेङ्गाङ्ग-सरोवर: कथं भाषते ?

(ङ) कर्म-धर्मदृष्ट्या भारतं कीदृशं भवेत् ?

(च) 'कोऽपि' याज्ञवल्क्यं पराजेतुं न शक्नोति' इति का उक्तवती ?

(छ) पलक्याशाकस्य खादनेन के लाभा: भवन्ति ?

(ज) केषां शाकानां पचनं विलम्बेन भवति ?

(झ) ज्ञानप्राप्ते: अनन्तरं मनुष्य: कस्य अनुभवं करोति ?

(ञ) चतुरङ्गक्रीडाया: वर्तमानस्वरूपे एकस्मिन् समूहे कति वटिका भवन्ति ?

7. लघूत्तरीया: प्रश्ना: समाधेया: – 6×3=18

(क) 'पा' धातो: विधिलिङ्-लकारे उ.पु. एक, द्वि, बहुवचनस्य रूपाणि लिखत।

(ख) स्वरसन्धया: परिभाषा सोदाहरणं लिखत।

(ग) भारतस्य नाम सिन्धुस्थानम् इति कथम् अभवत् ?

(घ) तत्पुरुषसमासस्य लक्षणं लिखत।

(ङ) 'अलाबूशाकस्य खादनेन के लाभा: भवन्ति ?

(च) श्रीमद्भगवद्गीतया: श्लोकं लिखत।

8. (क) कपोतशब्दस्य रूपाणि लिखत। 4

(ख) सन्धेः विच्छेदं कुरत—मुनीशः, पितृणम्, 4

चन्द्रशेखराजादः, योजनानुसारेण।

(ग) 'भारतं-धारतं' गीतस्य पंक्ति लिखत। 4

(घ) विशेषणं विशेष्यं च पृथक् कुरुत —

विशिष्टाकृतिः छुद्रग्रहाः, रिक्तस्थानम्, नूतनपिण्डाः 4

(ङ) शाकानां संस्कृतनामानि लिखत। 4

9. चन्द्रशेखराजादस्य जीवन-परिचयः। 5

अथवा

तेनाली-रामस्य जीवन-परिचयः लिखत।

10. अधोलिखितेभ्यः वाक्येभ्यः निर्दिष्टानि पदानि चित्वा लिखतः 5

(क) गार्गी स्त्रीणां गौरवम् अवर्धयत्—

सम्बन्ध सूचकं पदम् ....। क्रियापदम् ....।

(ख) भवत्सु कश्चित् अपि याज्ञवल्क्यं पराजेतुं न शक्नोति —

चित् प्रत्यययुक्तं पदम् ....। अव्ययपदम् ....।

(ग) प्रसन्नमनसा सः गार्ग्याः प्रशंसा कृतवान्।

कर्तृपदम् ....। कर्मकारकयुक्तं पदम् ....।

(घ) मम गोशालायाम् एकसहस्रं धेनवः सन्ति।

सम्बन्ध .... अधिकरणकारकयुक्तं पदम् ....।

(ङ) एकदा मिथिलायाः राजा यज्ञस्य आयोजनम् अकरोत्।

कर्तृपदम् ....। क्रियापदम् ....।